E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.316

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# आयुर्वेदज्यौतिषशास्त्रयोरन्तस्सम्बन्धः

**दिनेश मोहन जोशी**
सहायकाचार्यः
भारतीयप्रौद्योगिकसंस्थानम्, जोधपुरम् (राजस्थानम्)

**दिवाकरशर्मा**
आचार्यः (PG) – सिद्धान्तज्यौतिषशास्त्रम्,
ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आन्ध्रप्रदेशः)

**गिरीशभट्टः बि**
सिद्धान्तज्यौतिषशास्त्रे विद्यावारिधि(Ph.D.)-शोधच्छात्रः,
ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**शोधसारः** – चराचरेऽस्मिन् प्रपञ्चे आयुः कामयमाना मनुजाः स्वव्यापारम् आयुर्वेदज्यौतिषाभ्यां सम्पादयन्ति । आधिव्याधिभिः जायमानानां साध्यासाध्यरोगाणां शमनाय आयुर्वेदशास्त्रम्, पार्थिवजनानां नैके रोगास्तेषां जन्मचक्रस्य विभिन्नेषु स्थानेषु स्थितानां विविधग्रहाणां प्रभावपरिमाणेन ज्यौतिषशास्त्रञ्च प्रवर्तते। तत्र ज्यौतिषस्य विभागद्वयं सिद्धान्तः फलितञ्चेति जगति दृश्यते । सौरमण्डलवायुमण्डलपृथिवीसमुद्रदिगृतुवनस्पतीनामाधारेण विश्वस्य विविधतत्त्वाधारितरोगाणाम् उपशमनोपायाः शास्त्रेऽस्मिन् प्रतिपादिताः । इदमेव शास्त्रस्यास्य वैशिष्ट्यम् । आयुर्वेदेन साकं केवलं फलितज्यौतिषस्यैव साक्षात् सम्बन्धो वर्तते । सिद्धान्तज्यौतिषेण सह आयुर्वेदस्य साक्षात् सम्बन्धो न दृश्यते । आयुर्वेदे यथा व्याधीनां लक्षणानि, कारणानि, निवारणोपायाश्च निरूपिताः तथैव फलितज्यौतिषेऽपि । प्रसिद्धानां नवग्रहाणाम् उपपत्तित्वात् तेभ्यो रोगादिज्ञानम्, रत्नानि, मन्त्रव्यापारः, दानकर्म, ग्रहदोषोपशान्तये स्नानौषधिः, दक्षिणा, दानकालः, रोगावधिः, कार्यमुहूर्तः, सूर्यरश्मिचिकित्सा, स्वास्थ्यम्, वैद्यगारुड्यौ विद्ये, भोजनपात्राभूषणयोर्निर्माणञ्च कथं क्रियत इति विचारो व्यावर्णितः । पुनश्च सूर्यादिग्रहाणां स्वाग्रिमसञ्चारराशेः प्रागेव फलारम्भः, तत्र च सूर्यकुजयोः राश्यारम्भकाले,

गुरुभार्गवयोर्मध्यकाले, प्रारम्भादान्तं सौम्यस्य, शनिशशिनोः राश्यन्तकाले च फलनिगद अक्तः। तद्विषये शोधपत्रेऽस्मिन् सङ्क्षेपेण प्रकटीकृतः।

**कूटशब्दाः** – राजयक्ष्मा, जीर्णकासः, आमुष्मिकव्याधिः, बभ्रुवर्णी, कासश्वसनपक्षाघातः

**आयुर्वेदशास्त्रानुसारेण रोगाणां वर्गीकरणम्**

विश्वस्य सर्वेऽपि जीविन आधिव्याधिभिः पीडिता भवन्ति। आधिर्नाम मानसिकी पीडा, व्याधिर्नाम शारीरिकी पीडा। चरकसुश्रुतवाग्भट्टादिभिः आयुर्वेदाचार्यैः विभिन्नप्रकारैः व्याधीनां वर्गीकरणं कृतम्। सुश्रुतसंहिताया अनुसारेण व्याधिः चतुर्विधो भवति – आगन्तुकव्याधिः, शारीरिकव्याधिः, मानसिकव्याधिः, स्वाभाविकव्याधिश्चेति। आचार्यकश्यपो व्याधीनां पञ्च भेदान् कथयामास। तद्यथा – आगन्तुजव्याधिः, वातजव्याधिः, पित्तजव्याधिः, कफजव्याधिः, सन्निपातजव्याधिः चेति। आचार्यचरकस्य मतानुसारेण रोगस्त्रिविधो भवति – निजरोगाः, आगन्तुकरोगाः, मानसिकरोगाः चेति।

रोगाणां चिकित्सायै स्वीक्रियमाणस्य कालस्य आधारेण रोगाः साध्या असाध्याः चेति द्विविधा वर्तन्ते। साध्या रोगाः पुनः सुसाध्याः, कृच्छ्रसाध्याः चेति द्विविधा भवन्ति। असाध्या रोगा अपि याप्याः, अनुपक्रमाः चेति द्विविधा भवन्ति। इत्थं रोगाणां चिकित्सार्थं स्वीक्रियमाणस्य कालस्य आधारेण रोगाः सुसाध्याः, कृच्छ्रसाध्याः, याप्याः, अनुपक्रमाश्चेति चतुःप्रकारका भवन्ति। ते च रोगाः उत्तरोत्तरम् अधिकाः क्लेशदायकाः भवन्ति। एवं रोगभेदानां सामान्यपरिचयः।

चरकसंहिताया अनुसारेण आयुषः शेषत्वात्, पथ्यकरणेन च यो व्याधिः उपशमनं प्राप्य पुनो भयङ्करो जायते, एवञ्च पुनः पुनः प्रजायते, बहुदिनेभ्यः पीडयन्नस्ति स व्याधिः याप्य इत्युच्यते। यथोक्तम् –

**शेषत्वादायुषो याप्यमसाध्यं पथ्यसेवया।**
**लब्धाल्पसुखमल्पेन हेतुनाऽशुप्रवर्तकम्॥**
**गम्भीरं बहुधातुस्थं मर्मसन्धिसमाश्रितम्।**
**नित्यानुशायिनं रोगं दीर्घकालमवस्थितम्॥**[1]

इति।

गम्भीररोगाः, अनेकरसरक्तादिधात्वाश्रिताः, त्रिदोषजाः, चिकित्सयाप्यलाभदाः, मोहेन्द्रिये नाशकाः च रोगाः तथा व्यक्तौ दुर्बलस्य व्याधेश्च अरिष्टलक्षणानि उपस्थितानि भवेयुः, तादृशा रोगाः प्रत्याख्येया असाध्या भणिताः सन्ति। तद्यथा –

[1] चरकसंहिता – सूत्रस्थानम् १०.१७-१८

**विद्याद्द्विदोषजं तद्वत् प्रत्याख्येयं त्रिदोषजम् ।**

**क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणम् ॥**

**औत्सुक्यारतिसम्मोहकरमिन्द्रियनाशनम् ।**

**दुर्बलस्य सुसंवृद्धं व्याधिं सारिष्टमेव च ॥**[2]

इति ।

विद्वद्धुरीणचरकाचार्यस्य मते साध्यासाध्यव्याधयो मृदुदारुणभेदाभ्यां चतुर्विधा भवन्ति । अनन्तरं ता एव वेदनया, वर्णेन, निदानेन, स्थानेन, लक्षणेन, नामभेदेन चासाध्या भवन्ति । एतदनुसारेण असाध्यरोगा अपि साध्या भवितुमर्हन्ति, किन्तु विविधकारणेन ते जीर्णतां प्राप्नुवन्ति, ये च जीर्णत्रिदोषजसन्निपाताजातिभिर्ज्ञायन्ते । यथा –

**सन्त्येवंविधा रोगाः साध्या दारुणसम्मताः ।**

**ये हन्युरनुपक्रान्ता मिथ्याचारेण वा पुनः ॥**[3]

इति ।

उदाहरणाय सर्वप्रथमं मधुमेहस्योत्पत्तिः गुरोः स्निग्धद्रव्यस्य च सेवनेन, अम्ललवणयोरत्युपयोगेन, व्यायामाकरणेन, तूलादीनाम् अत्यधिकोपयोगेन शरीरे कफः, पित्तम्, मेदश्च वर्धते । यतो हि स्थिरवायुः कुपितो भूत्वा देहस्य ओजं स्वीकृत्य मूत्राशयं प्रविशति, तेन मधुमेहो जायते । विषयेऽस्मिन् ध्यातव्यं यत् मधुमेहस्योपेक्षायां स अधिकमांसयुतप्रदेशेषु, मर्मप्रदेशेषु, सन्धिषु च प्रविश्य सप्तप्रकारकाः कष्टप्रदपिण्डिकाः जनयति । ताश्च – शराविका, कच्छपिका, जालिनी, सर्षपी, अजली, विनता, विद्रधी चेति । उक्तेषु विद्रधी बाह्याभ्यन्तरभेदाभ्यां द्विविधा भूत्वा पाकमेति तथा च नैकप्रकारिका सम्भूय सन्निपातजं प्राप्य व्यक्तेः मृत्युकारिका भवति । उक्तञ्च –

**आसां हृन्नाभिबस्तिजाः परिपक्वाः सान्निपातिकी च मरणाय ॥**[4]

इति ।

चरकः स्वशास्त्रे कथयति यत् अन्तर्विद्रधी हृदये, नाभौ, वस्तौ चोत्पन्नं भूत्वा परिपाकमेति तथापि कुशलचिकित्सक उपशमयितुं समर्थः । परं तेन स्थानभेदेन लक्षणानि ज्ञातव्यानि ।

---

[2] चरकसंहिता – सूत्रस्थानम् १०.१९-२०

[3] चरकसंहिता – सूत्रस्थानम् १८.३७

[4] चरकसंहिता – सूत्रस्थानम् १७.१०३

मधुमेहसदृशो वातपित्तकफजन्यो हृदयरोगोऽपि कष्टसाध्यो भवति। मनुष्य असतर्कस्सन् तिलगुडस्य दुग्धस्य च प्रयोग अतिशयेन करोति तदा तस्य मर्मस्थानस्य हृदयस्यैकदेशे ग्रन्थिर्भवति। तस्यां ग्रन्थौ रसधातुना क्लेदो भवति। अजितेन्द्रियमनुष्यस्य हृदये क्लेदेन उत्पन्नकृमिभिः शनैः शनैः हृदयभक्षणं क्रियते । रोगेऽस्मिन् वातजः, पित्तजः, कफजश्च त्रिविधहृदयरोगस्य लक्षणसमावेशो भवति। अतः त्रिदोषजः हृदयसन्निपातजाभ्यां जीर्णव्याधिर्ज्ञायते। तद्यथा –

**हेतुलक्षणसंसर्गादुच्यते सान्निपातिकः।**

**त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते॥**[5]

**हृद्रोगं क्रिमिजं त्वेतैर्लिङ्गैर्बुद्ध्वा सुदारुणम्।**

**त्वरेत जेतुं तं विद्वान् विकारं शीघ्रकारिणम्॥**[6]

इति।

तथापि केचन तादृशा रोगा भवन्ति ये स्वभावलोकयोः प्रभावेण जीर्णव्याधिरूपेण ज्ञायन्ते। यथा – सन्धिवातः, आमवातः, रक्तचापः, ग्रहणी, आन्त्रशोथः (कोलाइटिस), श्वित्रः, गृध्रसी, हृदयरोगः, अतत्त्वाभिनिवेशः, उन्मादः, अपस्मारः, गुल्मः, अर्सः, राजयक्ष्मा, अर्शः, पाण्डुः, आनुवांशिकरोगः, जीर्णकासः, श्वासकष्टः चेत्यादि । वस्तुतः प्रत्येकं रोग उचितयोः पात्रपरिस्थित्योरनुसारं जीर्णः किं वा साध्यः भवितुमर्हति । यतो हि जीर्णव्याधेः तात्पर्यं तेषां रोगाणाम् अस्ति ये प्राय असाध्याः किं वातीव कष्टप्रदा भवन्ति। सामान्यतया वातपित्तकफानां साम्यावस्था प्रकृतिरित्युच्यते किन्तु प्रकृतौ, सौरमण्डले, वातावरणे च ऋत्वादीनां परिवर्तनेन प्राणीनां शरीरेऽपि परिवर्तनं भवति । तच्च परिवर्तनं रोग इत्युच्यते । एतादृशस्य रोगस्य परावर्तितप्रक्रिया चिकित्सा कथ्यते। यस्या अनाकर्णेन प्राणिनो मृत्युरपि भवति।

### रोगाणां चिकित्साक्रमः

वैद्येन रोगस्य चिकित्सा कथं करणीया इति अधोनिर्दिष्टः श्लोको निर्दिशति –

**भिषजा प्राक् परीक्ष्यैवं विकाराणां स्वलक्षणम्।**

**पश्चात् कर्मसमारम्भः कार्यः साध्येषु धीमता॥**

**साध्यासाध्यविभागज्ञो यः सम्यक् प्रतिपत्तिमान्।**

**न स मैत्रेयतुल्यानां मिथ्याबुद्धिं प्रकल्पयेत्॥**[7]

इति।

---

[5] चरकसंहिता – सूत्रस्थानम् १७.३६

[6] चरकसंहिता – सूत्रस्थानम् १७.४०

[7] चरकसंहिता – सूत्रस्थानम् १०.२१-२२

वैद्येन सर्वप्रथमं रोगिणः परीक्षणं कृत्वा रोगस्य नाम-प्रकृति-भेदादिकं ज्ञातव्यम् । तथा चायं रोगः साध्य असाध्य वेत्यपि ज्ञातव्यम् । यदि रोगः साध्य अर्थात् चिकित्सया उपशमनं कर्तुं शक्यः तर्हि वैद्यशास्त्रोक्तविधिना चिकित्सा करणीया ।

**ज्यौतिषशास्त्रस्याधारेण व्याधीनां चिन्तनम्, व्याधीनां निवारणे ज्यौतिषशास्त्रोक्ताः उपायाश्च**

व्याधीनां परिहारोपायेषु प्रायः सर्वैर्भारतीयैः किं वा ज्ञानशाखाभिः गहनचिन्तनं सम्पादितं येषु च साङ्ख्यनैयायिकवेदान्तिमीमांसकवैद्यभैषजचिन्तकज्यौतिषज्ञानाम् अस्ति महत्त्वपूर्णस्थानम् । एभिर्न केवलं लौकिकव्याधीनाम् अपितु आमुष्मिकव्याधीनां विनाशोपायेष्वपि गभीरतया विचारः कृतः । सर्वेषाम् अपेक्षया ज्यौतिषं सर्वातिशाय्युपायरूपेण मनीषिभिः स्वीकृतम् । यतो ह्येतज्ज्यौतिषं वेदस्य नेत्रं कथ्यते । अस्मिन् जन्मनि अनुभूयमानानां रोगादिपीडानां कारणीभूतानि जन्मान्तरकृतपापकर्माणि ज्यौतिषशास्त्रस्याधारेण दैवज्ञः ज्ञात्वा तन्निवारणार्थं शास्त्रोक्तप्रायश्चित्तानि निर्दिशति । उक्तञ्च मानसागर्याम् –

**श्रीजन्मपत्रीशुभदीपकेन व्यक्तं भवेद्भाविफलं समग्रम् ।**

**क्षपाप्रदीपेन यथा गृहस्थं घटादिजातं प्रकटत्वमेति ॥**[8]

इति ।

एतदतिरिक्तं ज्यौतिषशास्त्रस्य महत्त्वपूर्णं वैशिष्ट्यम् अस्ति यत् तस्य गणितीयसिद्धान्तानां माध्यमेन दीर्घकालीनरोगाणां विषये पूर्वज्ञानं प्राप्य व्यक्तिः तान् परिहर्तुं व्यवस्थां कर्तुं शक्नोति अथवा तेषां रोगाणाम् उद्भवात् वा वृद्धावस्थां प्राप्तुं वा पूर्वं निवारकव्यवस्थां कर्तुं शक्नोति । एतादृशीं सुविधां कर्तुं शक्नोति यान्येषु नास्ति तथा च एतेषां लक्षणानाम् कारणात् ज्यौतिषम् अन्येषां तुलने उपयोगी अद्वितीयञ्चेति वक्तुं नास्ति आवश्यकता । वेदाधारितत्वात् पूर्णनित्यरूपेण दृश्यमानं प्रत्यक्षं च भवति । अतः ज्यौतिषशास्त्रस्य रोगनिवारणोत्कृष्टता स्वत एव दृश्यते । अस्मिन् शास्त्रे व्याध्युपशमनस्य दशप्रकाराः दशासाधनानि वा वर्णितानि, यानि नान्ये उपायाः उल्लिखिताः ।

यथा सर्वेषां ज्ञानशाखानां दार्शनिकाः जगतः रोगसृष्टेः च भिन्नानि कारणानि मन्यन्ते तदनुसारेण रोगनिवारणाय अपि भिन्नान् उपायान् सूचयन्ति । तथा ज्यौतिषशास्त्रे सौरमण्डलम्, वायुमण्डलम्, पृथिवी, समुद्राः, दिशः, ऋतवः, तत्सम्बद्धाः वनस्पतयः इत्यादयः विश्वस्य विविधतत्त्वाधारितरोगाणाम् उपायान् कथयन्ति । दैवज्ञाः मन्यन्ते यत् जगति प्रत्येकं जीवः पृथिवीजलप्रकाशतेजवायुनिर्मितः सन् एषु एव निवसति । अतः तस्य शरीरस्य व्याधयः, हृदयस्य आधयः च तस्य विचारेषु, कर्मसु, वाचि, शरीरे वा परिवर्तनं जनयितुं शक्नुवन्ति । सर्वं

[8] मानसागरी १.२१

ग्रहनक्षत्रपञ्चतत्त्वाहाराचरणप्रमादकालवेगमाश्रित्य भवति। दैवज्ञानां मते एतेषां तत्त्वानां प्रभावः व्यक्तेरुपरि जन्मनः प्रागेव आरभ्यते, परन्तु जन्मसमये यः ग्रहः लग्ने भवति तस्य आजीवनं प्रभावः सर्वाधिकः भवति। एतदतिरिक्तं सूर्यः पृथिव्याः समीपस्थः प्रभावशाली चोज्ज्वलग्रहः इति कारणतः कुण्डल्यां सूर्यस्य स्थितिः लग्नात् परं विचार्यते। तदनन्तरं चन्द्रस्थितिः नवमस्थानञ्च (भाग्यस्थानम्) क्रमेण विचार्यते।

दैवज्ञानां मतं यत् पार्थिवजनानाम् अनेकाः रोगाः तेषां जन्मचक्रस्य विभिन्नेषु स्थानेषु स्थितानां विविधग्रहाणां तेषु प्रभावस्य परिणामः भवति यतो हि ग्रहनक्षत्रादिस्वभावः, परस्परं मैत्री, वैरम्, पृथिव्याः दूरम्, लग्नस्य कोष्ठकाः भिन्नाः सन्ति तथा च तेषां भिन्नाः महादशाः, अन्तरदशाः, उपदशाः, प्रत्यन्तर्दशाः च काले काले प्रचलन्ति। तस्मिन् समये तस्मिन् परिस्थितौ ग्रहाणां परिणामं ज्ञातुं पृथिव्या अक्षांशदेशान्तरसम्बद्धानि स्थानानि, परिस्थितयः, तेषां परस्परप्रभावाः च मनसि स्थापयितव्याः। ज्ञातव्यं यत् एतेषु सर्वेषु गहनज्ञानं ध्यानं च विना यः विद्वान् फलादेशं करोति स असफलो भवति तथा च न केवलं तेन सूचिताः अन्ये परिणामाः मिथ्या सिद्धाः भवन्ति, अपितु सूचिताः ज्यौतिषोपचाराः अपि अप्रभाविणः भवन्ति। यतोहि तस्मिन् समये ते ग्रहाः जनं न प्रभावयन्ति, अतः तेषां कृते कृताः उपायाः अपि निष्फलत्वं प्राप्नुवन्ति। ज्यौतिषी ग्रहलग्नादिना सह अन्यान् अपि विचारान् पश्येत् यैः फलादेशः व्याध्युपायः च सफलतां प्राप्नोत्। यथा –

**दशापहारेषु फलं यदुक्तं वर्णाधिकारानुगुणं वदन्तु।**

**छिद्रेषु सूक्ष्मेष्वपि तत्फलाप्तिः छायाङ्कवार्तश्रवणानि वा स्युः॥**[9]

इति।

अर्थात् जातकस्य उपरि पतन्त्याः ग्रहस्थितेः आधारेण, व्यक्तेः जातिपदाधिकारस्थित्यनुसारेण फलादेशः करणीयः, यतो हि ग्रहस्थितीनां छाया तस्योपरि पतति। कुण्डल्यभावेऽपि कुशलाः विद्वांसः कस्याश्चित् व्यक्तेः आकृतिम्, शरीरस्य कान्तिम्, छायाम्, गतिम्, वाक्, कर्म, व्यवहारं च दृष्ट्वा तस्य सर्वविधं ज्ञातुं शक्नुवन्ति। यतो हि ग्रहस्वभावानुसारेण तेषां व्यक्तेः उपरि प्रभावः लक्षणं च शास्त्रेषु बहुषु स्थानेषु व्याख्यातं भवति, तेषां शान्तिसम्बद्धाः उपायाः अपि सूचिताः सन्ति।

उदाहरणाय व्याधीन् तेषां कारणग्रहान् तदनुरूपान् उपायान् च विचारयामः तर्हि बहवो ग्रहाः पापाः क्रूराः मृदुस्वभावयुताः, बहवश्च सौम्या इति वक्तुं शक्यते। कुत्रचित् कुजशनिराहुकेतवः शुभफलं ददति, केषाञ्चनानां जनानां कृते सूर्यबृहस्पतिचन्द्राः चापि अशुभफलं दातुम् आरभन्ते। एतत् सर्वं लग्न-पक्ष-ग्रह-मैत्रीत्याद्यनुसारं भवति। यथा – यदा नानाग्रहाणां शक्तिः न्यूनीभवति तदा व्यक्तिः भिन्नरोगैः पीडितो भवितुम् आरभते। यथा –

---

[9] फलदीपिका २१.८४

➢ **सूर्यः** – विद्वदनुसारं नष्टबली सूर्यः विनाशकारी भवति तथा बुद्धिभेदस्य, भ्रमस्य, विवादस्य, शत्रुभयस्य, आर्थिहानेः च स्थितिं जनयति । यदि सूर्यस्य स्थितिः अशुभस्थानीया भवति तर्हि व्यक्तिः हृदयरोगैः, पित्तरोगैः, शरीरभङ्गैः, नेत्ररोगैः, शोकैः, हृदयवेदनाभिः, ज्वरैः, क्षयैः, गुल्मैः, ग्रहणीभिः, कर्णरोगैः च पीडितो भवति । एवमेव सूर्यस्य अन्तर्दशा, उपदशा, प्रत्यन्तर्दशा भवति चेत् शिरोवेदना, रक्तविच्छेदः, अग्निसम्बन्धाः उदरसम्बद्धाः च व्याधयो भवन्ति । यथोक्तं ताजिकनीलकण्ठ्याम् –

**दशारवेर्नष्टबलस्य पुंसां नृपाद्रिपोर्वा भयमर्थनाशम् ।**

**स्त्रीपुत्रमित्रादिजनैर्विवादं करोतिबुद्धिभ्रममामयञ्च ॥**[10]

इति ।

सारावल्यामपि भणितम् –

**क्षुत्तृष्णार्त्तिः शोको हृत्पीडा पैत्तिकास्तथा रोगाः ।**

**गात्रच्छेदो भवति हि सूर्यदशायामनिष्टायाम् ॥**[11]

इति ।

मानसागर्यामपि उक्तम् –

**शिरोरोगः प्रबलेभ्यो ज्वरातीसारशूलयोः ।**

**शरीरे क्लेशमाप्नोति सूर्यस्यान्तर्गते भृगौ ॥**[12]

इति ।

➢ **चन्द्रमाः** – यदा चन्द्रमाः नष्टबली भवति तदा कफज्वरकासशोकसन्तापापस्मारप्लीहाहृदयमानसिकक्षयफुफ्फुसरोगाः भवन्ति । यथा –

**इन्दोर्दशा नष्टबलस्य लोकापवादभीतिं धनधर्मनाशम् ।**

**शीतामयं स्त्रीसुतमित्रवैरं दौःस्थ्यंयदत्ते विरसान्नभुक्तिम् ॥**[13]

इति ।

अस्य ग्रहस्य वर्णः शुक्लः सूर्यस्य च रक्तः इत्युच्यते तथा चन्द्रदशायां सूर्यस्य अन्तर्दशा यदा भवति तदा सः व्यक्तिः शोणितविकारो भवति । फलदीपिकाकरस्य च मते

---

[10] ताजिकनीलकण्ठी – दशाफलाध्यायः – श्लोकः ८

[11] सारावली ४०.२८ ५

[12] मानसागरी – पञ्चमोऽध्यायः – सूर्यमहादशफलम् – श्लोकः ९

[13] ताजिकनीलकण्ठी – दशाफलाध्यायः – श्लोकः १३

शुक्रस्य महादशायां चन्द्रः प्रविशति तदा व्यक्तिः नखशिरदन्तयक्ष्मागुल्मसङ्ग्रहणीवातपित्तरोगैः पीडितो भवति।

- **कुजः** – कुजो ज्वरकण्डूरक्तबन्धनपित्तशत्रुभयदो भवति यदा स अशक्तो भवति। अस्य वर्णो रक्तः तथा चायं मूर्च्छायाः मूत्रकृच्छ्ररोगस्य च जनको भवति। अनेन जातके गुल्मार्शकुष्ठविद्रधिग्रन्थिस्फोटविषादिरोगाः भवन्ति। यथोक्तं मानसागर्याम् –

**बिन्दुस्तस्य फलं शश्वदुदराग्निरुजः सदा।**

**शिरःशूलं प्रजायेत रक्तपित्तरुजा भवेत्॥**[14]

इति।

सूर्यदशायां कुजस्यान्तर्दशेत्थं वर्णिता –

**कौज्यां शत्रुविमर्दश्च विग्रहो बन्धुभिः सह।**

**रक्तपित्तकृता पीडा परस्त्रीसङ्गमो भवेत्॥**[15]

इति।

एवमेव शुक्रदशायां कुजस्यान्तर्दशायां सम्भाव्यरोगाश्च वर्णिताः –

**वातपित्तक्षयो रोगो महोत्साहो न संशयः।**

**भूयः स्याद्भूमिलाभश्च शुक्रस्यान्तर्गते कुजे॥**[16]

इति।

सारावल्यामपि ईरितम् –

**परदाररतिर्द्वेष्यो गुरुसत्यानामधर्मनिरतश्च।**

**पित्तकृतैरपि दोषैरभिभूतो मानवो भवति॥**[17]

इति।

- **बुधः** – बुधस्य वर्णो हरितो भवति, तस्य दशायां तस्य नष्टबलकारणेन मनुष्यस्य बुद्धौ दोषाः, प्राणभयवातकफरोगाः च भवन्ति। तथास्य दशायां चन्द्रस्य अन्तरदशायां सत्यां कुष्ठगण्डविकारक्षयभगन्दराः केतोरन्तरदशायां च उदरवेदना भवति। यथोक्तं ताजिकनीलकण्ठ्याम् –

---

[14] मानसागरी – चतुर्थोऽध्यायः – अष्टकवर्गज्ञानम् – भौमबिन्दुफलम् – श्लोक १

[15] मानसागरी – पञ्चमोऽध्यायः – भौमदशायां भौमान्तर्दशाफलम् – श्लोक १

[16] मानसागरी – पञ्चमोऽध्यायः – शुक्रदशायां भौमान्तर्दशाफलम् – श्लोक १

[17] सारावली ४०.३६

**दशापतौ हीनबले बुधे स्यात् स्वबुद्धिदोषो वधबन्धभीतिः ।**

**दूरेगतिर्वातकफामयार्त्तिर्निखातवित्तस्य च नापि लाभः ॥**[18]

इति ।

सारावल्यामपि ईरितम् –

**पीडां धातुत्रितयात्पारुष्यं बन्धनं तथोद्वेगम् ।**

**मानसशोकं वाऽपि बुधस्य कष्टा दशा कुरुते ॥**[19]

इति ।

बुधदशायां दिवाकरस्य अन्तर्दशा चेत् –

**प्रविशन्ती चन्द्रदशा बुधस्य कण्डूं करोति कुष्ठं च ।**

**क्षयरोगमङ्गभङ्गं गजाद्भयं वाहनविनाशम् ॥**[20]

इति ।

- **गुरुः** – पीतवर्णीयो बृहस्पतिः स्वनष्टवलतायाम् अशुभदशायाञ्च कफप्रकोपशरीरवेदनामेदक्षयोदररोगवीर्यरोगशोकशोथमानसिकक्लेशान् जनयति । यथोक्तं ताजिकनीलकण्ठ्याम् –

**गुरोर्दशानष्टबलस्य पुंसां ददाति दुःखानि रुजं कफार्त्तिम् ।**

**कलत्रपुत्रस्वजनारिभीतिं धर्मार्थनाशं तनुपीडनं च ॥**[21]

इति ।

सारावल्यामप्युक्तम् –

**गात्रश्वथपृथुशोकं पङ्गुत्वं गुल्मकर्णरोगांश्च ।**

**पुंस्त्वविनाशं मेदःक्षयं नृपतितो भयं समाप्नोति ॥**[22]

इति ।

उत्तरकालामृतेऽपि भणितम् –

**जीवा पापदशा महीसुरभयाधिव्याधिधैर्यच्युता**

---

[18] ताजिकनीलकण्ठी – दशाफलाध्यायः – श्लोकः २३

[19] सारावली ४०.४०

[20] सारावली ४१.३१

[21] ताजिकनीलकण्ठी – दशाफलाध्यायः – श्लोकः २८

[22] सारावली ४०.४४

**धान्यानर्थमहीसुरार्तिजनकक्रोधाशनार्त्तिक्षयान् ।**[23]

इति ।

➢ **शुक्रः** – बहुवर्णीयः शुक्रः बुद्धिभ्रमश्रान्तक्लान्तदुर्बलमैथुनजन्यरोगैः तदा पीडयति यदा सः नष्टबली अशुभस्थाने वा भवेत् । अस्य महादशायां सूर्यस्य अन्तरदशा नेत्रकुक्षिकपोलेषु रोगान् जनयति । अनेन उपदंशरुग्णतावृषलस्पर्शजन्याः रोगाः भवन्ति । यथोक्तं ताजिकनीलकण्ठ्याम् –

**दशा भृगोर्नष्टबलस्य दत्ते विदेशयानं स्वजनैर्विरोधम् ।**

**पुत्रार्थभार्याविपदोरुजश्च मतिभ्रमोऽपि व्यसनं महच्च ॥**[24]

इति ।

उत्तरकालामृतेऽपि निगदितम् –

**शौक्री पापदशाकलत्रभयकृन्नीचार्थहानिप्रदा-**

**त्यन्नस्तेयमहाप्रदोषविपुलस्त्रीवर्गरोगोद्भवान् ।**[25]

इति ।

शुक्रस्य दशायां सूर्यस्यान्तर्दशा सति उपर्युक्ताः रोगाः भवन्ति, किन्तु चन्द्रस्यान्तर्दशायां पाण्डुवित्यादयः रोगा अपि भवन्ति । तद्यथा –

**गण्डोदराक्षिरोगैः क्षितिपतितो बन्धनादिभिस्तप्तः ।**

**शुक्रदशायां सूर्ये विचरति नूनं भवेत्पुरुषः ॥**

**अन्तर्दशा दशायां सितस्य शशिनो यदा भवति चिह्नम् ।**

**नखदशनशिरोरोगैः सह भवति च कामिलारोगः ॥**[26]

इति ।

➢ **शनिः** – कृष्णवर्णीयः शनिग्रहः शीतोग्रवायुत्रिदोषविषजन्यरोगान् वर्धयति । यथा –

**दशाशनेर्नष्टबलस्यपुंसामनेकधातुव्यसनानि दत्ते ।**

**स्त्रीपुत्रमित्रस्वजनैर्विरोधं रोगाभिवृद्धिं मरणेनतुल्यम् ॥**[27]

---

[23] उत्तरकालामृतम् ६.११

[24] ताजिकनीलकण्ठी – दशाफलाध्यायः – श्लोकः ३३

[25] उत्तरकालामृतम् ६.१२

[26] सारावली ४१.४३-४४

[27] ताजिकनीलकण्ठी – दशाफलाध्यायः – श्लोकः ३८

इति।

- **राहुः** – बभ्रुवर्णी राहुः अशुभस्सन् कासश्वसनपक्षाघातान् जनयति तथा च दुष्टग्रहरूपेण शनिराहुकेतूनां जन्मारोहात् षष्ठे गृहे स्थितिर्भवति तर्हि सो जातको विषप्रमेहगुल्मपाण्डुसङ्ग्रहणीक्षयप्रभृतिरोगैः पीडितो भवति। यथोक्तम् –

**कासश्वासमहाप्रतापवनदुर्गोपासका दुष्टता**

**साङ्गत्यं पशुभिस्त्वसव्यलिपिलेख्यं क्रूरभाषा त्वगोः ।**[28]

इति।

- **केतुः** – विडालनेत्रवर्णयुक्तस्य केतुग्रहस्य अशुभत्वे हृदयवेदनाकम्पननाडीरोगज्वरक्षयविद्रधिशूलपाषाणव्रणा इत्यादयो रोगा भवन्ति। यथा –

**चण्डीशेश्वरविघ्नपादिसुरवृन्दोपासना वैद्यका**

**श्वानः कुक्कुटगृध्रमोक्षसकलैश्वर्यक्षयार्तिज्वराः ॥**

**गङ्गास्नानमहातपोऽनिलनिषादस्नेहभूतिप्रदाः**

**पाषाणो व्रणमन्त्रशास्त्रचपलत्वब्रह्मवेतृत्वता।**

**कुक्ष्यक्ष्यार्त्तिजडत्वकण्टकमृगज्ञानानि मौनव्रतम्।**

**वेदान्तोऽखिलभोगभाग्यरिपुपीडोत्पन्नतापाल्पभुक् ॥**

**वैराग्यं च पितामहक्षुदतिशूलस्फोटकाद्या रुजः**

**श्रृङ्गीभृङ्गिविरुद्धबन्धनकृताज्ञां शूद्रगोष्ठिर्ध्वजात् ॥**[29]

इति।

एतदतिरिक्तं ग्रहाणां दशासु नानाग्रहान्तर्दशाजन्यप्रसिद्धाः रोगा अपि दैवज्ञैः उल्लिखिताः सन्ति। यथा – सूर्यदशायां शुक्रस्य अन्तर्दशा यदा आगच्छति तदा कण्ठरोगः, ज्वरः, शूलं च भवति। यथोक्तं सारावल्याम् –

**शिरसो रुग्गलरोगश्छिद्रं सहसा ज्वरः शूलम्।**

**तपनदशायां शुक्रे देशत्यागो भवेदरिभिः ॥**[30]

---

[28] उत्तरकालामृतम् ५.५३

[29] उत्तरकालामृतम् ५.५३-५४$\frac{१}{२}$

[30] सारावली ४१.१६

इति।

बुधस्य अन्तर्दशागच्छति तदा दद्रुकण्डूकुष्ठादिरोगा भवन्ति। यथोक्तं सारावल्याम् –

**दद्रूविचार्चिकाद्यैः पापैः कुष्ठैश्च गर्हितशरीरः।**

**तरणिदशायां प्रविशति बुधो यदा स्यादरेर्वृद्धिः॥**[31]

इति।

यदा च सूर्यः शत्रुगृहे तिष्ठति तदा कटिकण्ठनेत्रमस्तिष्कज्वरकुष्ठरोगान् ददाति। यथोक्तं सारावल्याम् –

**राज्यं ददाति विपुलं दशा रवेर्लग्नसंस्थितस्य नृणाम्।**

**केन्द्रस्थितस्य दद्यात्कटिगलनेत्रप्रकोपमरिगस्य॥**

**नीचस्य दशा भानोरक्ष्णोर्नाशं ज्वरं शिरोरोगम्।**

**बन्धनमन्याश्च रुजः कुष्ठामयदर्शनं चिह्नम्॥**[32]

इति।

सारावल्याम् एकराशिस्थेभ्यः षड्ग्रहेभ्यः, पञ्चग्रहेभ्यश्च जन्यपीडानां वर्णनमपि प्राप्यते।

एवं ज्यौतिषशास्त्रं प्रायः सर्वेषां रोगाणां मूलकारणं ग्रहमण्डलम् एव मन्यते। अत एव व्याध्युपशमनस्य औषधिनिर्माणात् स्नानयज्ञदानरत्नदक्षिणामन्त्रादिधारणं यावत् सर्वे उपायाः ग्रहकेन्द्रितरूपेण एव वर्णिताः। ग्रहदोषनिवृत्तेः अनन्तरं रोगाः स्वयमेव शान्ताः भविष्यन्तीति तेषां मतम्। अत एव उत्तरकालामृतकारः कालिदासः धन्वन्तरिशब्देषु औषधनिर्माणसेवनयोः उत्तमस्थानस्य सन्दर्भे निगदति यत् –

**शस्तं चामृतनाडिकासु रचितं दिव्यौषधं प्राशितं**

**तत्पीयूषसमं ज्वरामयहरं दोषत्रयघ्नं तदा।**

**आरोग्यपदमिन्द्रियस्फुटकरं चायुःप्रदं भेषजं**

**कार्यं तद्बहुधा जगाद भगवान्धन्वन्तरिश्चाब्धिजः॥**[33]

इति।

---

[31] सारावली ४१.१४

[32] सारावली ४०.५४-५५

[33] उत्तरकालामृतम् ८.९

विशेषफलादेशाय शास्त्रेऽस्मिन् ग्रहानुसारं भारतस्य सर्वदिक्स्थितभूभागानां विभाजनात्मकनिर्देशो दृश्यते । तच्च –

**अर्कः कालिङ्गविषये यवनेषु च चन्द्रमाः ।**

**शुक्रः समतटे जातः सैन्धवेषु बृहस्पतिः ॥**

**मागधेषु बुधो जातः सौराष्ट्रेषु शनैश्चरः ।**

**अङ्गारकस्तूज्जयिन्यां राहुः केतुश्च द्राविडे ॥**[34]

इति ।

जीर्णव्याधीनाम् उपशमनोपायानां समस्या वर्तते, एतदर्थं सुश्रुताचार्यः प्रतिपादयति यत् –

**तत्र, स्थानपरित्यागशान्तिकर्मप्रायश्चित्तमङ्गलजपहोमोपहारेज्याञ्जलिनमस्कारतपोनियम-दयादानदीक्षाभ्युपगमदेवताब्राह्मणगुरुपरैर्भवितव्यम्, एवं साधु भवति ।**[35]

इति ।

अर्थात् व्याधिशान्त्यर्थग्रहदोषजन्यपापान्मुक्तये प्रायश्चित्तजपहोमदानतपदक्षिणानमस्कार स्थानत्यागादिकं रत्नधारणं च करणीयम् ।

मनुष्यस्य सर्वविधक्लेशदूरीकरणाय ग्रहाधारिताः केचनांशाः प्रतिपाद्यन्ते । ते च –

**(१) रत्नधारणम्** – प्रत्येकं ग्रहस्य अशुभप्रभावशान्तये तत्तद्ग्रहस्य रत्नधारणं शास्त्रविदितमस्ति । यस्य प्रत्यक्षप्रमाणान्यपि फलमाध्यमेन दृश्यन्ते । यथोक्तं मुहूर्तचिन्तामणौ रामदैवज्ञेन –

**माणिक्यमुक्ताफलविद्रुमाणि गारुत्मकं पुष्पकवज्रनीलम् ।**

**गोमेदवैदूर्यकमर्कतः स्यू रत्नान्यथो ज्ञस्य मुदे सुवर्णम् ॥**[36]

इति ।

अधोनिर्दिष्टस्य कोष्ठकस्यावलोकनेन श्लोकस्यास्याभिप्रायः स्पष्टतया अवगम्यते –

---

[34] सारावली – अध्यायः ७.१४-१५

[35] सुश्रुतसंहिता – सूत्रस्थानम् ६.२०

[36] मुहूर्तचिन्तामणिः ४.१०

| ग्रहाः | दिशः | रत्नानि | | |
|---|---|---|---|---|
| | | संस्कृतनामानि | हिन्दीनामानि | आङ्ग्लनामानि |
| सूर्यः | मध्यभागः | माणिक्यम् / वज्रकम् / ताम्रम् | मानिक | Ruby |
| चन्द्रमाः | अग्निकोणाभिमुखा | मुक्ता / चन्द्रमणिः | मोती | Pearl |
| कुजः | दक्षिणाभिमुखा | विद्रुमम् / पाटलविद्रुमम् / प्रवालम् | मूँगा | Coral |
| बुधः | ईशान्या | मरकतमणिः / नीलमणिः/ तार्क्ष्यम् | पन्ना | Emerald |
| गुरुः | उत्तरा | पुष्परागः / सुवर्णकम् | पोखराज | Topaz |
| शुक्रः | पूर्वा | वज्रम् | हीरा | Diamond |
| शनिः | पश्चिमा | नीलम् / मरकतमणिः / इन्द्रनीलम् | नीलम | Saphire |
| राहुः | नैर्ऋत्या | गोमेदम् | गोमेद | Zircon / Hessonite |
| केतुः | वायव्या | वैदूर्यम् / गोदन्ती | लहसुनिया | Cat's eye |

**कोष्ठकः १ : ग्रहाणां रत्नानि**

एवं रत्नज्ञानात्परं तत्तद्ग्रहेण वर्णितरोगशान्तये ज्यौतिषीणां परामर्शपुरस्सरं रत्नधारणं कुर्यात् । दैवज्ञो यथा परामर्शं ददाति यच्च मुहूर्तादिकं ददाति तदनुरोधेन जातको रत्नधारणं कुर्यादिति शास्त्राचारः । इतस्तत अन्यथा धारणेन हानिरपि भवितुमर्हति, अत अवश्यो दैवज्ञः प्रष्टव्यः । तत्सम्बन्धिविवरणमधः कोष्ठके दीयते –

| रत्नानि | वर्णाः | राशयः | आकाराः |
|---|---|---|---|
| वज्रम् | नीलः | तुलावृषभौ | नोपलभ्यते |
| नीलम् | धूम्रः | मकरकुम्भौ | नोपलभ्यते |
| मरकतमणिः | हरितः | कन्यामिथुने | नोपलभ्यते |

| रत्नानि | वर्णाः | राशयः | आकाराः |
|---|---|---|---|
| विद्रुमम् | पीतः | मेषवृश्चिकौ | कुजस्य स्थितिः ४, ९, १२ च स्थाने भवेत् तदा "८रत्ती"त्यस्य रजताङ्गुलीये धारयेत्। |
| मुक्ता | कौस्तुभः | कर्काटकः | ४, ६, ११ च "रत्ती"त्यस्य भवेन्न तु ७, ८ च "रत्ती"त्यस्य। |
| पुष्परागः | पीतः (अल्पमात्रायाम्) | मीनधनुषी | ७, १२ च "रत्ती"त्यस्य धारणयोग्यो न तु ६, ११, १५ च "रत्ती"त्यस्य। |
| माणिक्यम् | श्वेतरक्तः | सिंहः | नोपलभ्यते |

**कोष्ठकः २ : ग्रहसूचकरत्नानां वर्णाः राशयः आकाराश्च**

प्रपञ्चेऽस्मिन् जनाः धनार्थिनो भूत्वा स्वव्यापारम् अभिकुर्वन्ति, अतस्तदर्थम् आयुर्वेदप्रकाशकारः रत्नसंज्ञां प्रत्यपादि। तच्च –

**धनार्थिनो जनाः सर्वे रमन्तेऽस्मिन्नतीव यत्।**

**अतो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥**[37]

इति।

रत्नसंज्ञायाः परं तत्तद्ग्रहानुसारं रत्नानि ग्रहाणामुपयोगश्च रसरत्नसमुच्चये व्यावर्णितम्। यथोक्तम् –

**माणिक्यमुक्ताफलविद्रुमाणि तार्क्ष्यञ्च पुष्पं भिदुरञ्च नीलम्।**

**गोमेदकञ्चाथ विदूरकञ्च क्रमेण रत्नानि नवग्रहाणाम् ॥**

**ग्रहानुमैत्र्या कुरुविन्दपुष्पप्रवालमुक्ताफलतार्क्ष्यवज्रम्।**

**नीलाख्यगोमेदविदूरकञ्च क्रमेण मुद्राधृतमिष्टसिद्ध्यै ॥**[38]

इति।

ननु रत्नज्ञानात्परम् एषां प्रयोगः कुत्रेति प्रश्ने जिज्ञासमाने सति गद्यते -

**रसे रसायने दाने धारणे देवतार्चने।**

**सुलक्ष्याणि सुजातीनि रत्नान्युक्तानि सिद्धये ॥**[39]

इति।

[37] आयुर्वेदप्रकाशः ५.२

[38] रसरत्नसमुच्चयः ४.५–६

[39] रसरत्नसमुच्चयः ४.७

अनुकूलप्रतिकूलाभ्यां रत्नानि भवन्ति। एवं हि जगति मनुजैः धृतरत्नैः फलव्यापारः कीदृगिति धिया अनुकूलानां प्रतिकूलानाञ्च रत्नानां प्रभावं वर्णयति। यथा –

**सूर्यादिग्रहनिग्रहापहरणं दीर्घायुरारोग्यदं**

**सौभाग्योदयभाग्यवश्यविभवोत्साहप्रदं धैर्यकृत्।**

**दुश्छायाचलधूलिसङ्गतिभवाऽलक्ष्मीहरं सर्वदा**

**रत्नानां परिधारणं निगदितं भूतादिभिर्नाशनम्॥**[40]

इति।

**(२) मन्त्राः** – रत्नरश्मितरङ्गसमानं मन्त्राणामपि उच्चारणेन जातके जायमाना अशुभकिरणाः निष्प्रभाविणो भवन्ति। ग्रहाणां सत्फलप्राप्तये दैवज्ञपरामर्शेण तत्तद्ग्रहस्य मन्त्राणां जपानुष्ठानादिकम् आचरणीयम्। उपर्युक्तानां रत्नानां धारणात्प्राक् इम एव मन्त्राः प्रतिष्ठायै भवन्ति। एवमेव प्रत्येकं ग्रहस्य मन्त्रसङ्ख्यापि निर्दिष्टा भवति, अतस्तदनुरोधेनाचरणीयम्। स्पष्टार्थमग्रे उपस्थाप्यते –

| ग्रहाः | मन्त्राः | जपसङ्ख्याः |
|---|---|---|
| सूर्यः | आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च॥<br>हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन्न॥[41] | ७००० |
| चन्द्रमाः | इमन्देवाऽअसपत्क्न**ꣳ**सुवद्ध्म्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय॥<br>इमममुष्य्यपुत्त्रममुष्यैपुत्त्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्म्मणानाꣳराजा॥[42] | ११००० |
| कुजः | अग्निर्म्मूर्द्धा। दिवःककुत्त्पतिःपृथिव्व्याऽअयम्॥<br>अपाꣳरेताꣳसिजिन्वति॥[43] | १०००० |
| सौम्यः | उदद्बुद्ध्यस्वाग्ग्नेप्रतिजागृहित्त्वमिष्ट्टापूर्त्तेसꣳसृजेथामयञ्च॥<br>अस्मिन्न्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्न्विश्श्वेदेवायजमानश्चसीदत॥[44] | ९००० |
| गुरुः | बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु॥<br>यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम्॥ | १९००० |

[40] रसरत्नसमुच्चयः ४.७८

[41] शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता ३३.४३

[42] शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता ९.४०

[43] शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता ३.१२

[44] शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता १५.५४

| ग्रहाः | मन्त्राः | जपसङ्ख्याः |
|---|---|---|
| | उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा ॥[45] | |
| भार्गवः | अन्नात्त्परिस्रुतोरसम्ब्रह्म्मणाव्व्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः ॥<br>ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥[46] | १६००० |
| मन्दः | शन्नोदेवीरभिष्ट्टयऽआपोभवन्तुपीतये ॥<br>शंय्योरभिस्रवन्तुनः ॥[47] | २३००० |
| राहुः | कयानश्चित्त्रऽआभुवदूतीसदावृधःसखा ॥<br>कयाशचिष्ठ्ठयाव्वृता ॥[48] | १८००० |
| केतुः | केतुङ्कृण्ण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥<br>समुषद्भिरजायथाः ॥[49] | १७००० |

**कोष्ठकः ३ : नवग्रहाणां मन्त्राः जपसङ्ख्याश्च**

**(३) दानोपायाः** – ग्रहाणां नष्टबलस्य, अशुभफलस्य, पापस्थानस्य च प्रभावशान्तये नैकप्रकारकाणि दानानि ज्योतिर्विदैः निगदितानि, यैः तत्तद्ग्रहसम्बन्धिव्याधयः शान्तिमुपयान्ति । यथोक्तञ्च शास्त्रे –

**सूर्यस्य –**

**गोधूमान्नं गुडं ताम्रं काञ्चनं रक्तचन्दनम् ।**

**माणिक्यं रक्तवस्त्रञ्च गामर्काय निवेदयेत् ॥**

**चन्द्रमसः –**

**तण्डुलं वंशपात्रस्थं मुक्तां रौप्यं सितांशुकम् ।**

**घृतकुम्भं सकर्पूरं वृषं चन्द्राय चार्पयेत् ॥**

**कुजस्य –**

**गोधूमगुडताम्राणि प्रवालं काञ्चनं वृषम् ।**

**रक्तं मसूरं वस्त्रञ्च चन्दनं कुजहेतवे ॥**

**सौम्यस्य –**

---

45 शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता २६.३

46 शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता १९.७५

47 शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता ३६.१२

48 शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता २७.३९

49 शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता २९.३७

**नीलांशुकं सर्वपुष्पं गजदन्तञ्च काञ्चनम् ।**

**बुधाय दासी मुद्गाज्ये कांस्यं दद्यात्प्रयत्नतः ॥**

**गुरोः –**

**हरिद्रां शर्करां पीतधान्यं काञ्चनमम्बरम् ।**

**लवणं पुष्परागञ्च तुरगं प्रीतये गुरोः ॥**

**भार्गवस्य –**

**स्वर्णं चित्राम्बरं रौप्यं धेनुं श्वेततुरङ्गमम् ।**

**वज्रमाज्यं तण्डुलांश्च कर्पूरं प्रीतये भृगोः ॥**

**शनेः –**

**नीलरत्नं तिला नीलाः कुलत्था महिषी शनेः ।**

**तिलतैलं कृष्णवस्त्रं लौहं चेति विदुर्बुधाः ॥**

**राहोः –**

**गोमेदमश्वं तैलञ्च तिलानपि च कम्बलम् ।**

**नीलवस्त्रञ्च लौहञ्च राहोर्दानं बुधा विदुः ॥**

**केतोः –**

**वैदूर्यरत्नं तैलञ्च तिलकम्बलमर्पयेत् ।**

**शस्त्रं मृगमदं नीलपुष्पं केतुग्रहाय तत् ॥**[50]

इति ।

एवमत्र ध्यातव्यं यत् दानं रत्नधारणं वा भवेत् तत्साफल्यतायै मन्त्राणां जपः आवश्यकः ।

**(४) ग्रहदोषोपशान्तये स्नानौषधिविधानम् -** वैदिककालादेव जलचिकित्सा स्वचिन्तने बहुमहत्त्वपूर्णा वर्तते, यतो हि जले अमृतनिवास इति मन्यन्ते । अनया औषधिना बाणप्रहारजन्यव्रणस्य, नेत्ररोगस्य, विषप्रभावस्य, हृदयरोगस्य च निवारणं भवति । यथोक्तं भावप्रकाशे –

**लाजावतीकुष्ठबलाप्रियङ्गुघनैश्च सिद्धार्थनिशाह्वयेन ।**

[50] भावप्रकाशः – दुष्टग्रहाणां दानजपादिकथनाध्यायः – २ तः १० श्लोकाः

**क्तेनतोयेन च पुङ्खया शुभं स्नानं हि लोध्रेण खगार्दितानाम् ॥**[51]

इति।

अर्थात् उपर्युक्तानां वस्तूनां जलमिश्रेण स्नात्वा सूर्यादिग्रहजन्यव्याधय उपशान्तिं यान्ति।

(५) **दक्षिणा -** विविधग्रहाणां शान्तये दैवज्ञैः दक्षिणायाः विधानं निगदितं येन व्याध्युपशमनं भवति। तच्चोक्तम् –

**धेनुः शङ्खोऽरुणरुचिवृषः काञ्चनं पीतवस्त्रं**

**श्वेतश्चाश्वः सुरभिरसिता कृष्णलोहं महाजः।**

**सूर्यादीनां मुनिभिरुदिता दक्षिणास्तु ग्रहाणां**

**स्नानैर्दानैर्हवनबलिभिस्तेऽत्र तुष्यन्ति तस्मात् ॥**[52]

इति।

उपरि श्लोके उक्तानि दक्षिणावस्तूनि क्रमशः सूर्यादीनां ज्ञेयानि। सर्वे च ग्रहाः स्नानदानहोमबलिभिः प्रसन्नाः भवन्ति।

(६) **दानकालनिर्धारणम् –** ज्यौतिषज्ञानशाखायां कस्य ग्रहस्य कदा दानं शुभप्रदमिति निर्देशो दत्तो वर्तते। यतो हि प्रत्येकं ग्रहः सर्वदा बली अल्पबली वा न तिष्ठति। भणितं यथा –

**बुधस्य घटिका पञ्च सौरेर्मध्याह्नमेव च।**

**राहुकेत्वोश्च रात्रौ च जीवेन्द्वोश्चैव सन्ध्ययोः॥**

**उदये भृगुरव्योश्च भौमस्य घटिकाद्वये।**

**समे काले न कर्तव्यं दातॄणां प्राणनाशनम् ॥**[53]

इति।

अस्मिन्नेव क्रमे प्रभाववशरोगशान्तये विद्वद्भिः ग्रहाणां बलवत्तायाः समयोऽपि निर्धारितः। तच्च यथा ज्योतिषतत्त्वप्रकाशे –

**प्राग्रात्रिभागेऽतिबली शशाङ्कः शुक्रो निशार्धेऽवनिजो दिनान्ते।**

**प्रातर्बुधो मध्यदिने च सूर्यः सर्वत्र जीवोऽर्कसुतो दिनान्ते ॥**[54]

---

51 भावप्रकाशः – दुष्टग्रहाणां दानजपादिकथनाध्यायः – श्लोकः १६

52 ज्योतिषतत्त्वप्रकाशः ४.५७०

53 ज्योतिषतत्त्वप्रकाशः ४.५७१-५७२

54 ज्योतिषतत्त्वप्रकाशः ४.५७३

इति।

अर्थात् रात्रेः प्रथमभागे चन्द्रमाः, अर्द्धरात्रौ शुक्रः, दिनान्ते शनिकुजौ, प्रातो बुधः, मध्याह्ने सूर्यगुरू च सदा बलिनो भवन्ति।

(७) **कार्यमुहूर्तविधानम्** – दैवज्ञैः सर्वेभ्यः कार्येभ्यः भिन्नभिन्नानां मुहूर्तानां विधानं कृतम्, यैः व्याधयः प्रशान्ताः भवन्ति। तत्र पूर्णिमावास्यासङ्क्रान्तिचतुर्दश्यष्टमीषु तैलस्त्रीमांसानां सेवनं न कार्यम्। एवमेव ज्वरशोभामृत्व्यादीनां विचारः तत्तद्वारेषु तैलवशात् स्फुटीकृतः। तद्यथा –

**पूर्णिमादर्शसङ्क्रान्तिचतुर्दश्यष्टमीषु च।**

**नरश्चाण्डालयोनौ स्यात्तैलस्त्रीमांससेवनात्॥**

**तैलाभ्यङ्गे रवौ तापः सोमे शोभा कुजे स्मृतिः।**

**बुधे धनं गुरौ हानिः शुक्रे दुःखं शनौ सुखम्॥**

**रवौ पुष्पं गुरौ दूर्वा भौमवारे च मृत्तिका।**

**शुक्रे तु गोमयं क्षिप्त्वा तैलदोषो न विद्यते॥**[55]

इति।

(८) **सूर्यरश्मिचिकित्सा** – आङ्ग्लसमाजेऽस्याः "क्रोमोपैथी" इति नाम। एतस्याः वर्णनम् अथर्ववेदे (१ / २२/ १), ऋग्वेदे (५ / ४९ / ९) च प्राप्यत एव। सूर्यस्य रश्मिभिः कृमिनाशो भवति। अयं पृथिव्या अत्यन्तसमीपवर्तीग्रहो वर्तते, अत अस्य प्रभावः पृथिव्याम्, पृथिवीवासिषु च साक्षाद्भवति। वैद्यानुसारमस्य रश्मिभिः पाण्डुचर्महृदयपीडादीनाम् उपशमनं भवति। एवमेव वायुसेवनेन, प्राणायामेन, रक्तगोर्दुग्धेन, मूलिकया, इक्षुरसेन च सेवनेन पाण्डुरोगो नाशमेति।

(९) **स्वास्थ्यविचारः वैद्यगारुड्यौ च विद्ये** – फलितज्यौतिषे नैकग्रन्थेषु स्वास्थ्यचिन्तनं विहितम्। वराहमिहिरेण स्वबृहज्जातके चन्द्रयोगाध्याये स्वस्थ-सुखी-वैभवशाली-दीर्घायुजातकानां ग्रहनक्षत्राणि सविस्तरेण वर्णितानि। तथा च बृहज्ज्योतिषसारकारेण रोगमुक्तिः सविस्तृता प्रतिपादिता। इत्थमेव शास्त्रेऽस्मिन् वैद्यकगारुड्यौ विद्येऽभ्यसितुं मुहूर्तविधानमपि दृश्यते। तच्च –

**हस्तत्रयेऽनुराधायां पुनर्भेश्रवणत्रये।**

**मूले चान्त्येऽश्विनीपुष्ये ज्येष्ठाश्लेषार्द्रभेमृगे॥**

---

[55] ज्योतिषतत्त्वप्रकाशः ६.४९-५१

**वैद्यविद्याकुजेब्जेऽर्के ज्येष्ठाहीनेऽथगारुडी ।**[56]

इति ।

नाम हस्त-चित्रा-स्वाती-अनुराधा-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषक्-मूल-रेवती-अश्विनी-पुष्य-ज्येष्ठा-आर्द्रा-मृगशिराख्येषु नक्षत्रेषु भानुकुजवासरोः वैद्यकारम्भः, ज्येष्ठां विहाय उक्तमुहूर्तेषु गारुड्यारम्भः च प्रशस्तः ।

**(१०) भोजनपात्राभूषणयोः निर्माणम्** – मनुजस्य स्वास्थ्येन भोजनाभूषणयोः साक्षात् सम्बन्धो विद्यते । अतः तैलाभ्यङ्ग-यात्रा-गृहनिर्माण-वास्त्वनुरूपं भोजनपात्राभूषणयोः मुहूर्तधात्वोः व्यवस्थितविधानं शास्त्रेऽस्मिन् निगद्यते । यथोक्तं ज्योतिषतत्त्वप्रकाशे –

**त्रिपुष्कराभिधे योगे त्र्युत्तरे रेवतीद्वये ।**

**सुवर्णादिषु पात्रेषु भोजनादिशुभप्रदम् ॥**[57]

इति ।

एतेभ्यः तथ्येभ्यः परं दैवज्ञैः केचन आवश्यकाः सिद्धान्ताः सूचिताः, यतो हि तज्ज्ञानेन पूर्वोक्तव्याध्युपशमनाय निदानचिकित्सयोः सहायता मिलति । तच्च –

**कालदेशकुलाचारसङ्गकर्मानुसारतः ।**

**दिशन्ति फलमेते हि ग्रहाः सूक्ष्मप्रमाणतः ॥**[58]

इति ।

**(११) विशेषः** – सारावल्यनुसारं सूर्यस्य पञ्चदिनेभ्यः, कुजस्याष्टदिनेभ्यः, सौम्यस्य सप्तदिनेभ्यः, शुक्रस्य सप्तदिनेभ्यः, चन्द्रमसः त्रिघटिभ्यः, राहोः त्रिमासेभ्यः, शनेः षण्मासेभ्यः, गुरोश्च द्विमासाभ्यां प्रागेव स्वाग्रिमसञ्चारराशेः फलारम्भो जायते । एवमेव सूर्यकुजौ राश्यारम्भकाले, गुरुशुक्रौ मध्यकाले, बुधः प्रारम्भादान्तम्, शनिचन्द्रमसौ राश्यन्तकाले च स्वस्वफलानि ददति । स्फुटतायै कोष्ठके प्रदर्श्यते –

| **ग्रहाः** | सूर्यः | चन्द्रमाः | कुजः | सौम्यः | गुरुः | शुक्रः | शनिः | राहुः |
|---|---|---|---|---|---|---|---|---|
| **फलकालः** | पञ्चदिनानि | त्रिघट्यः | अष्टदिनानि | सप्तदिनानि | द्वौ मासौ | सप्तदिनानि | षण्मासाः | त्रिमासाः |

[56] बृहज्ज्योतिषसारः – प्रकीर्णभागः – २१ – १३७

[57] ज्योतिषतत्त्वप्रकाशः ६.१२

[58] ज्योतिषतत्त्वप्रकाशः ५.२७९

**कोष्ठकः ४ : ग्रहाणां फलकालाः**

**अनयोरन्तःसम्बन्धविशेषत्वं सूचयति –**

ज्यौतिषशास्त्रे व्यक्तेः आयुषः निर्धारणस्य अतीव प्राधान्यं दत्तमस्ति । यतो हि रोगादिहेतुभिः कदापि व्यक्तेः मृतिः भवितुमर्हति । आयुरेव नास्ति चेत् जातके राजयोगादय उत्तमयोगा वर्तन्ते चेदपि किमपि प्रयोजनं नास्ति । यथोक्तं मानसागर्याम् –

**पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।**

**आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ॥**[59]

इति ।

प्रश्नमार्गेऽपि कथितम् –

**आयुः पूर्वं परीक्षेत पश्चाल्लक्षणमादिशेत् ।**
**अनायुषां तु मर्त्यानां लक्षणैः किं प्रयोजनम् ॥**
**आयुरेव विशेषेण प्रथमं चिन्त्यतेऽधुना ।**
**स्वस्थमुद्दिश्य वा प्रश्न एव वातुरमित्ययम् ॥**[60]

इति ।

आयुर्वेदशास्त्रे आयुषः कृते यावन्महत्त्वं दत्तमस्ति तावदेव महत्त्वं ज्यौतिषशास्त्रेऽपि दत्तमस्तीत्यस्य कृते एते श्लोकाः प्रमाणरूपेण सन्ति । आयुर्वेद-ज्यौतिषयोरुभयोरपि शास्त्रयोः लक्ष्यम् एकमेव रोगादीनां निवारणं भूत्वा सुखशान्त्यादिभिः आनन्देन जीवनयापनम् । अत एव आयुर्वेद-ज्यौतिषयोरुभयोरपि शास्त्रयोः रोगनिदानविधय उक्ताः सन्ति । आयुर्वेदशास्त्रे चिकित्सया रोगनिवारणोपायाः कथिताः । ज्यौतिषशास्त्रे तु तत्तद्रोगकारकग्रहाणां सन्तुष्टये तत्तद्ग्रहोक्तरत्नधारणेन, तत्तद्ग्रहसम्बद्धदेवानां मन्त्रजपादिभिश्च रोगपरिहाराय प्रायश्चित्तविधयः कथिताः सन्ति । केषाञ्चनानां रोगाणां निवारणं केवलं चिकित्सया एव भवति, केषाञ्चनानां रोगाणां निवारणं केवलं मन्त्रजपादिभिरेव भवति । पुनः केषाञ्चनानां रोगाणां निवारणाय आयुर्वेदादिवैद्यशास्त्रैः निर्दिष्टा चिकित्सा, ज्यौतिषशास्त्रोक्तरीत्या तत्तद्रोगकारकग्रहसम्बद्धदेवोपासनादिकञ्च उभयमपि करणीयं भवतीति बहूनाम् अनुभवोऽपि विद्यते ।

आयुर्वेदशास्त्रे यथा वात-पित्त-कफाख्यानां त्रिदोषाणां प्राधान्यमस्ति तथैव ज्यौतिषशास्त्रेऽपि । ज्यौतिषशास्त्रे रव्यादिग्रहाणां त्रिदोषकारकत्वं कथितमस्ति । यथोक्तं प्रश्नमार्गे –

---

[59] मानसागरी – चतुर्थोऽध्यायः – आयुर्भावविचारः – श्लोकः १

[60] प्रश्नमार्गः ९.३-४

**पित्तं वातकफौ पित्तं वातपित्तकफाः कफः ।**

**कफवातौ च वातश्च सूर्यादीनां प्रकीर्तिताः ॥**[61]

इति ।

स्पष्टमत्र कोष्ठके –

| **ग्रहाः** | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| **कारकदोषाः** | पित्तम् | वातकफौ | पित्तम् | वातपित्तकफाः | कफः | कफवातौ | वातः |

**कोष्ठकः ५ : ग्रहाणां त्रिदोषकारकत्वम्**

आयुर्वेदशास्त्रे ये ये रोगाः कथिताः ते सर्वेऽपि कर्मजरोगाः दोषजरोगाश्चेति प्रकारद्वयेन वर्गीकृताः । अस्माभिः कृतानां पापकर्मणां वशात् ये रोगाः सम्भवन्ति ते एव कर्मजन्यरोगाः इत्युच्यन्ते । तथा च मिथ्याहारव्यवहारमाध्यमेन ये रोगाः सम्भवन्ति ते दोषजन्यरोगाः इत्युच्यन्ते । यथोक्तं सुश्रुतसंहितायाम् –

**कर्मजा व्याधयः केचित् दोषजाः सन्ति चापरे ।**

**कर्मदोषोद्भवाश्चान्ते कर्मजास्तेष्वहेतुकाः ॥**[62]

इति ।

ज्यौतिष-चिकित्सा-दर्शनशास्त्रेषु सामान्यरूपेण कर्मणां चर्चा लभ्यते । तत्र दर्शनशास्त्रे तावत् सञ्चित-प्रारब्ध-क्रियमाणाख्यानां त्रिविधानां कर्मणाम् उल्लेखो वर्तते । आयुर्वेदशास्त्रे यानि कर्मजन्यकर्माणि भवन्ति तानि दर्शनशास्त्रे सञ्चितकर्माणीत्युच्यन्ते । सञ्चितकर्माणि पापकर्माणि शुभकर्माणि चेति द्विविधानि । सञ्चितपापकर्माणि रोगस्य कारणानि भवन्तीति ज्यौतिषशास्त्रे प्रतिपादितमस्ति । यथोक्तं प्रश्नमार्गे –

**जन्मान्तरकृतं पापं व्याधिरूपेण जायते ।**[63]

इति ।

आयुर्वेद-ज्यौतिषशास्त्रयोः प्रतिपादितेषु उन्मादरोगकारणेषु साम्यं दृश्यते । तद्यथा –

**हर्षेच्छामयशोकादेर्विरुद्धाशुचिभोजनात् ।**

**गुरुदेवादिकोपाच्च पञ्चोन्मादा भवन्त्यथ ॥**[64]

इति ।

---

[61] प्रश्नमार्गः ११.४

[62] सुश्रुसंहिता – उत्तरतन्त्रविमर्शः ४०.१६३

[63] प्रश्नमार्गः १३.२९

[64] प्रश्नमार्गः १२.३४

एवमेव चरकवाक्यम् –

**विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् ।**

**उन्मादहेतुर्भयहर्षपूर्वा मनोऽभिघातो विषमाश्च चेष्टाः ॥**[65]

इति ।

प्रश्नमार्ग-चरकसंहिताख्ययोः उभयोः ग्रन्थयोः उन्मादरोगस्य पञ्च भेदाः कथिताः । अस्य रोगस्य चिकित्साक्रमोऽपि समानरूपेण कथितः । यथोक्तं प्रश्नमार्गे –

**वातोन्मादे स्नेहपानं पित्तोन्मादे विरेचनम् ।**

**श्लेष्मके नस्यवमनमागन्तुष्वखिलाः क्रियाः ॥**[66]

इति ।

एवमेव चरकसंहितायाम् –

**उन्मादे वातजे पूर्वं स्नेहपानं विशेषवित् ।**

**कफपित्तोद्भवे त्वादौ वमनं सविरेचनम् ॥**[67]

इति ।

मुख्यरूपेण विविधरोगाणाम् औषधचर्चा आयुर्वेदशास्त्रे समुपलभ्यते, केषुचित् फलितज्यौतिषग्रन्थेष्वपि रोगनिरूपणसन्दर्भे प्रसङ्गानुसारेण कानिचन औषधानि प्रतिपादितानि । यथा कल्याणघृतस्य चर्चा अधोनिर्दिष्टग्रन्थेषु –

तत्र च सारावल्याम् –

**सप्ताष्टमषष्ठस्थाः शशिनः सौम्या हरन्त्यरिष्टफलम् ।**

**पापैरमिश्रचाराः कल्याणघृतं यथोन्मादम् ॥**[68]

इति ।

एवमेव सुश्रुतसंहितायाम् –

**विडङ्गत्रिफलामुस्तमञ्जिष्ठादाडिमोत्पलैः ।**

**श्यामैलवालुकैलाभिश्चन्दनामरदारुभिः ॥**

---

[65] चरकसंहिता – चिकित्सास्थानम् ९.४

[66] प्रश्नमार्गः १२.४१

[67] चरकसंहिता – चिकित्सास्थानम् ९.२५-२६

[68] सारावली ११.७

**बर्हिष्ठरजनीकुष्ठपर्णिनीसारिवाद्वयैः ।**
**हरेणुकात्रिवृद्दन्तीवचातालीशकेशरैः ॥**
**द्विक्षीरं साधितं सर्पिर्मालतीकुसुमैः सह ।**
**गुल्मकासज्वरश्वासक्षयोन्मादनिवारणम् ॥**[69]

इति ।

तथा चैत्थं चरकसंहितायामपि –

**नीलोत्पलैलामञ्जिष्ठादन्तीदाडिमकेशरम् ।**
**तालीशपत्रं बृहती मालत्याः कुसुमं नवम् ॥**
**विडङ्गं पृश्निपर्णी च कुष्ठं चन्दनपद्मकौ ।**
**अष्टाविंशतिभिः कल्कैरेतैरक्षसमन्वितैः ॥**
**चतुर्गुणे जले सम्यग्घृतप्रस्थं विपाचयेत् ।**
**अपस्मारे ज्वरे कासे शोषे मन्देऽनले क्षये ॥**
**वातरक्ते प्रतिश्याये तृतीयकचतुर्थके ।**
**छर्द्यर्शोमूत्रकृच्छ्रेषु विसर्पोपहतेषु च ॥**[70]

इति ।

इत्थं तावत् कल्याणघृतचर्चा शास्त्रे विहिता । नूनं विविधरोगाणाम् उत्पत्तिविकासशमनानि दृग्गोचराणि भवन्ति ।

**निष्कर्षः** – शोधपत्रेऽस्मिन् आयुर्वेदज्यौतिषयोः नैके ग्रन्था अवलोकिताः, विषयस्यास्य च नैकविचाराः सङ्क्षेपेण उद्धृताः । आयुर्वेदशास्त्रे व्याधीनां निवारणोपायाश्च यथा विवेचिताः तथैव ज्यौतिषशास्त्रेऽपि तेषाम् उपायाः, धार्मिकविधयश्च निर्दिष्टाः सन्ति । शोधपत्रस्यावलोकनेन जीर्णव्याधीनां निदानचिकित्सयोः ज्यौतिषशास्त्रीयसिद्धान्तानाम् अभूतपूर्वं योगदानं विद्यते, अत उभयोः शास्त्रयोः साक्षात्सम्बन्धो वर्तत इति निष्कर्षरूपेण वच्मः ।

## सन्दर्भग्रन्थसूची

[69] सुश्रुतसंहिता – उत्तरतन्त्रम् ६२.२३-२५

[70] चरकसंहिता – चिकित्सास्थानम् ९.३६-४१

१. **अष्टाङ्गशारीरम् ;** ग्रन्थकर्ता – वैद्यरत्नम् पि. एस्. वारियर्, संस्करणम् – सा.यु. २००५, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

२. **आयुर्वेदप्रकाशः ;** संस्करणम् – सा. यु. २०१४, प्रकाशनसंस्था – चौखम्भा भारती अकादमी, वाराणसी

३. **आयुर्वेदे ज्यौतिषम्;** लेखकः – डॉ. लक्ष्मीनारायणमिश्रः, सम्पादिका – श्रीमती पूनममिश्रा, प्रथमं संस्करणम् – सा.यु. २०१३, प्रकाशनसंस्था – कला एवं धर्म शोधसंस्थानम्, वाराणसी

४. **उत्तरकालामृतम् ;** संस्करणम् – सा. यु. १९६२, प्रकाशनसंस्था – रञ्जन पब्लिकेशन, नयी दिल्ली

५. **उत्तरकालामृतम्;** ग्रन्थकर्ता – कालिदासः, प्रकाशनसंस्था – रञ्जन् पब्लिकेशन्, नवदेहली

६. **चरकसंहिता ;** संस्करणम् – चतुर्थम् - सा. यु. १९९८, प्रकाशनसंस्था – चौखम्भा औरियन्टालिया, वाराणसी

७. **ज्यौतिषतत्त्वप्रकाशः ;** संस्करणम् – सा. यु. २०१०, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरिज आफिस, वाराणसी

८. **ताजिकनीलकण्ठी ;** संस्करणम् – प्रथमम् - सा. यु. १९९८, प्रकाशनसंस्था – चौखम्भा संस्कृत भवन, वाराणसी

९. **त्रिदोषवादः ;** प्रथमं संस्करणम् – सा.यु. २००८, प्रकाशनसंस्था – चौखम्बासंस्कृतप्रतिष्ठानम्, नवदेहली

१०. **प्रश्नमार्गः – द्वितीयो भागः,** ग्रन्थकर्ता – इटक्काट् नम्पूतिरिः, व्याख्याकारः – सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस – वाराणसी

११. **प्रश्नमार्गः – प्रथमो भागः,** ग्रन्थकर्ता – इटक्काट् नम्पूतिरिः, व्याख्याकारः – सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस – वाराणसी

१२. **फलदीपिका**; ग्रन्थकर्ता – मन्त्रेश्वरः, हिन्दीव्याख्याकारः – डॉ. हरिशङ्करपाठकः, संस्करणवर्षम् – सा.यु. २०१२, प्रकाशनसंस्था – चौखम्भा सुरभारती प्रतिष्ठाम्, वाराणसी

१३. **फलितसङ्ग्रहः ;** संस्करणम् – सा. यु. २००१, प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशन, वाराणसी

१४. **बृहज्ज्यौतिषसारः ;** संस्करणम् – सा. यु. २०१०, प्रकाशनसंस्था – सावित्री ठाकुर प्रकाशन, रथयात्रा चौराहा, वाराणसी

**१५. भावप्रकाशः** ; संस्करणम् – सा. यु. १९९८, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरिज आफिस, वाराणसी

**१६. मानसागरी** ; संस्करणम् – सा. यु. २०१७, प्रकाशनसंस्था – खेमराज श्रीकृष्णदास, मुम्बई

**१७. मुहूर्तचिन्तामणिः** ; ग्रन्थकर्ता – रामदैवज्ञः, संस्करणवर्षम् – सा.यु.२०००, प्रकाशनसंस्था – चौखम्भा सुरभारती प्रकाशनम्, वाराणसी

**१८. रसरत्नसमुच्चयः** ; संस्करणम् – सा. यु. २०१९, प्रकाशनसंस्था – खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

**१९. शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता** ; संस्करणम् – सा. यु. २०२१, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

**२०. सारावली** ; संस्करणम् – तृतीयम् - सा. यु. २०१३, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

**२१. सुश्रुतसंहिता** ; संस्करणम् – सा. यु. १९११, प्रकाशनसंस्था – खेमराज श्रीकृष्णदास, मुम्बई

**२२.** https://niimh.nic.in/ebooks/ecaraka/

**२३.** https://niimh.nic.in/ebooks/esushruta/